**International Journal of Research in Social Sciences**
Vol. 7 Issue 1, Janaury 2017,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gage as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# पर्यावरणचेतनाविमर्शः - वाल्मीकिरामायणसन्दर्भे

**डॉ. सोमनाथसाहुः***

**शोधसारः-** संस्कृतवाङ्मये काव्यानां महाकाव्यानां च महती प्रथिता परम्परा, तत्र चोपलब्धानां शास्त्रीयाणां प्रसृतानाञ्च लौकिकानां तथ्यानां नैकद्यष्ट्या विविधमेव वैशिष्ट्यमिति विषयो न वर्ततेऽविदितः। तत्रापीदृशानां काव्यसृजने सिद्धहस्तानां कवीनाम्महाकवीनां वा कर्मविषयोऽपि भवति तथैव महत्त्वयुतः। तादृशेष्वेव कविकर्मस्वथवा काव्यप्रयोजनेषु विद्यतेऽन्यतमं शिवेतरक्षतिरूपं कर्मेति। वर्तमाने पर्यावरणविषयमाधृत्य सकलं जगत् समस्यायमानं सज्जागरूकमिव प्रतिभातीति स्फुटमेव, सन्दर्भेऽस्मिन् आदितमे महाकाव्ये रामायणे महाकविना वाल्मीकिना सम्प्रदर्शिता पर्यावरणचेतनाशिवेत रक्षतिरूपकविकर्मण: स्वरूपोद्धाटनद्वारा महाकाव्यस्यास्य माहात्म्यं किञ्चिद् विशिष्य स्पष्टयतीति तथ्यं स्वीकर्तुं शक्यते। महाकाव्येऽस्मिन् कुत्रचित्स्फुटतया कर्हिचिच्च गवेषणात्मिकया दृष्ट्या पर्यावरणचेतनाया: स्वरूपमनुशीलयितुं शक्यते। अद्यावधि पर्यावरणचेतनाविषयस्य विशिष्टम्महत्त्वमभिलक्ष्यैव वस्तुतश्शोधपत्रेऽस्मिन् वाल्मीकिरामायणस्थनैककथाप्रसङ्गानुसारेणैतच्चेतनातत्त्वनिदर्शनस्य प्रयासः "वाल्मीकियरामायणे सम्प्राप्तभूमिजलादिपञ्चमहाभूतसम्बद्धचेतनत्वाधारेण प्राणिवर्ग प्रकृति-अन्यान्यचेतनत्वसमुपस्थापनेन"[i] च विशद्य विहितोऽस्ति। तस्माद् वाल्मीकीयं रामायणन्नाम महाकाव्यमिदम्पर्यावरणचेतनादृशाऽपि तथैव विशिष्टं यथाऽन्य शास्त्रीयालोचनेन, एवमेतत्स्थपर्यावरणचेतनत्वसमुपस्थापनं ह्यस्य शोधपत्रस्य विषयवस्त्विवति स्पष्टयितुं विहितोऽयम्प्रयासः।।

### वाल्मीकिरामायणनिहितः पर्यावरणचेतनाविषयः

### काव्यन्तद्विशिष्टप्रयोजनविषयश्च

'कवृ वर्णे'[ii] इत्यस्माद्धातो: 'ऋहलोर्ण्यत्'[iii] सूत्रेणानेन ण्यत्प्रत्यये कृते काव्यमित्यस्य पदस्य साधुत्वं प्रतिपाद्यते। कवेः स्वकर्मणि विहितं वर्णनपटुत्वं हि काव्यत्वम् इति

* सहायकाचार्यः, राष्ट्रियसंस्कृतसंस्थानम्, भोपालपरिसरः, भोपालम्

काव्यस्वरूपप्रदर्शकं वचनम् इति वक्तुं शक्यते। यद्यपि कविशब्दस्य प्रयोगो वैदिकसाहित्येषु प्रथमतया प्राप्यते[iv] तथाऽपि वर्णनानैपुण्यात्मकन्तत्सम्बद्धं काव्यं महाकाव्यं वा, इत्यर्थे पदस्यास्य प्रसिद्धिर्महाकविवाल्मीकिप्रणीतरामायणतो वेदव्यासप्रणीतमहाभारततश्चैव प्रारभत। एतादृशस्य वर्णनानैपुण्यात्मकस्य कविकर्मणः किमुद्देश्यमिति प्रश्ने समुदिते काव्यप्रकाशकारेण मम्मटाचार्येण षट्संख्याकमस्योद्देश्यं प्रयोजनभूततया निहितमित्युत्तरितम् तद्धि षट्सङ्ख्याऽऽत्मकम्प्रयोजनन्तस्यानुसारम्-

**काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।**

**सद्यः परनिर्वृत्तये कान्तासम्मिततयोपदेशयुज।।**[v]

एतेषु काव्यप्रयोजनेषु शिवेतरक्षतिरूपम्प्रयोजनमस्ति किञ्चिद् विशिष्टम्। काव्यस्य शिवेतरक्षतिरूपप्रयोजनसाधनेन तु न केवलं सूर्यशतककारादयः कवय एव लाभान्विताः जाता अपितु शिवेतरम् अमङ्गलक्षतिरूपप्रयोजनं हि काव्यास्वादनकर्तॄन् सहृदयानपि तथैव लाभान्वितं कुर्याद् एतदर्थमपीदृशस्य काव्यप्रयोजनस्य साफल्यम् अप्रतिहतम्भवत् सन्तिष्ठते।

सुप्रसिद्धमेव तथ्यमिदं यद् रामायणं नाम महाकाव्यं भारतीयाया: संस्कृतेरादर्शभूततया संस्कृतवाङ्मये विराजत इति। परन्तु काव्यसम्बद्धं लक्ष्यलक्षणयोरन्वितमपीदं रामायणं नाम महाकाव्यम्पश्चाद्वर्तिकाव्यशास्त्राधारभूतत्वेन विशिष्यते। यद्यपि काव्यलक्षणादीनां काव्यगतविविधानामन्यसिद्धान्तानां सामान्यप्रतिपत्त्यर्थं वाल्मीकिविरचितं रामायणं नाम महाकाव्यं सुप्रसिद्धन्तथाऽपि काव्यकृन्मम्मटोक्तकाव्यलक्षणादिविषयस्याद्यतनीं विशिष्टस्वीकृतिमाधृत्य तदुक्तकाव्यप्रयोजननिकषे षड्विधात्मकम्प्रयोजनमत्र महाकाव्ये समीहितुं शक्यते, तत्र च शिवेतरक्षतिर्नाम प्रयोजनम्महाकाव्येऽस्मिन् पर्यावरणचेतनाविषयस्य सम्पोषकत्वेन वर्तते सुगुम्फितम् इति नूनमेव पर्यावरणम्प्रति दत्तचेतसोल्लेखयितुं शक्यते।

**वाल्मीकिरामायणन्तदीयपर्यावरणचेतनाविषयत्वञ्च**

परिमण्डलस्य किं वा पर्यावरणस्य समग्रतश्शद्ध्यर्थं साम्प्रतिकञ्जगच्चिन्तितः सदेतद्विषयकं सञ्चानं चेतनां वा प्रकटय्य प्रकृतिप्रदत्तपर्यावरणसंरक्षणाय विविधयाजनानां सङ्कल्पनाकार्यान्वयनादिभिः सह दत्तावधानं दरीदृश्यते। एतत्पर्यावरणसम्बद्धाश्चेतानां वयं वैदिकसाहित्यत:[vi] प्रारभ्याद्यावधि संस्कृतवाङ्मय यावदजस्रम् अनुशीलयितुं शक्नुमः। ईदृश्या एव चेतनायाः प्रकाशनं रामायणे वाल्मीकिना कुत्र-कुत्र प्रसङ्गानुसारं विहितम् इत्यस्य दिग्दर्शनस्य प्राक् पर्यावरणविषयसम्बद्धो विचार इदानीम्प्रस्तूयते।

**पर्यावरणपदार्थ:-** परि 'आ' इत्यभयोपसर्गपर्वकाद 'वृञ्' वरणे[vii] इत्यर्थमूलकाद्धातोः, करणाधिकरणयोश्च[viii] सूत्रेणानेन ल्युट्प्रत्यये सति पर्यावरणमित्यस्य पदस्य विधीयते

शाब्दिकव्युत्पत्तिः। परित आसमन्ताच्चावरणमिति विग्रहवाक्यम्पदस्यास्य। एतच्चावरणम्बाह्यमान्तरिकमुभयम्भवितुमहर्ति, परं बाह्यमेव सर्वतो विस्तीर्णं प्राकृतिकम्प्रभावोत्पादकन्तत्त्वमेव पर्यावरणमिति'[ix] प्रसिद्धव्यवहारापेक्षयाऽत्र पर्यावरणपदस्यायमेवार्थो ग्रहीष्यते।

**वाल्मीकिरामायणे पर्यावरणचेतनाविषयस्य बीजावगमः-** इदानीं वाल्मीकीय-रामायणोपलब्धम्पर्यावरणचेतनाविषयमाधारीकृत्यसप्रमाणं विवेचनमुपस्थाप्यते। सर्वप्रथमन्तावद् वाल्मीकिर्यो हि हृदयाद्रावकघटनादर्शनेन द्रवितः सन् महाकाव्यस्यास्य विलेखनम्प्रारब्धवान्, तस्य मूलमेवेदम्पर्यावरण-चेतनत्वमिति। तद्धटितं हृदयसंस्पर्शि वृत्तन्तस्य स्वविरचितस्य रामायणाख्यस्य प्रसिद्धस्य महाकाव्यस्यैव बीजभूतं वचनश्चेदम्, यदस्य पर्यावरणचेतनत्वस्य साक्षादुपस्थापकम्-

**मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।**
**यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।**[x]

स्वसमीपस्थमेव प्रेमनिमग्नं विहरन्तञ्च क्रौञ्चयुगलम्पश्यतस्तस्य प्रशान्तचेतसो हि वाल्मीकिमुनेर्मुखात् सद्य एव पुंसक्रौञ्चस्य पापविनिश्चयेन निषादेन हननानन्तरमेतन्मार्मिकं वचनं विस्फुरितम्। वचनञ्चेदं प्रकृतिस्थं यत्किमपि जीवितन्तन्न हिंसितव्यम्, इत्यनयैव पर्यावरणचेतनायुतभावनयाऽस्ति सम्पूरितम्। एवमीदृक्पर्यावरणचेतनाविषयस्य नैकत्र निदर्शनमत्र महाकाव्ये दृष्टिपथमायाति।.

**वाल्मीकिरामायणे भूमिचेतनाविषयः-** पर्यावरणं ह्यस्माकम्पञ्चमहाभूतैर्भवति निर्मितम्। तथोक्तम्- पृथिव्यापस्तेजोवायुराकाशमिति भूतानि।'[xi] आदौ तावद् वाल्मीकिरामायणसङ्केतितम्पृथ्वीविषयकं किं वा भूमिसम्बद्धम्पर्यावरणचेतनातथ्यमुल्लिख्यते। वाल्मीकीये रामायणे रामस्यैव सर्वाधिकम्महत्त्वं कथासरण्यनुसारमिति तु नामानुगुणमभिलक्ष्यत एव; एतादृशस्य रामस्यैवार्धाङ्गिनीरूपेण चित्रितेयं सीता, वस्तुतो भूमेरासीदुत्पन्नेति उत्तरकाण्डोपलब्धं वाल्मीकिवचनमेतत् प्रमाणभूतम्-

**उत्पन्ना मैथिलकले जनकस्य महात्मनः।**
**सीतोत्पन्ना तु सीतेति मानुषैः पुनरुच्यते॥**[xii]

स्वयन्तस्य पितर्वचनेन[xiii] अन्यच्च रोषयुक्तेन रामवचनेनापि सीताया उत्पत्तिर्भूमितोऽभूद् इति ज्ञायते, तथा हि-

**कामं श्वशूर्ममैव त्वं त्वत्सकाशात् तु मैथिली।**
**कर्षता फालहस्तेन जनकेनोधृता पुरा।।**[xiv]

हलकर्षणेन भूमौ निर्मितरेखायास्सीताया जन्मनो वर्णनाद् अथानयैव रामार्धाङ्गिन्या जनक्याः वा पृथिव्याः विवरम्प्रति याचनानन्तरमधिष्ठातृदेव्या प्रथिव्यैव तस्याः स्वीकाररूपेण कथाप्रसङ्गोपन्यासेनापि सीताया वसुधाप्रतिनिधिरूपं सन्दर्शितं वाल्मीकिना मुनिना।

एवमेव लक्ष्मणम्प्रत्युक्तस्य सम्भावितरामवचनसम्बद्धस्य सुप्रसिद्धसुभाषितस्य चानुसारमपि जन्मभूमिविषयिणी चेतनाऽनुभवितुं शक्यते। तच्च वाल्मीकिरामायणेऽनुपलब्धञ्जन्मभूमिम्प्रति श्रद्धया सम्पूरितं सुभाषितसमं वचनमिदम्-

अपि स्वर्णमयी लङ्का न मे लक्ष्मण! रोचते। जननी जन्मभूमिश्च स्वर्गादपि गरीयसी॥

अनेन तत्तद्विषयकेण सर्वेण मानवोचितभावानुसारेण कथाविवर्तनेन च यथाकञ्चिद् भूमिविषयिण्या: पर्यावरणचेतनाया एव निदर्शनञ्जायते।

**वाल्मीकिरामायणे जलचेतनाविषय:-** एवमेव जलविषयकञ्चेतनत्वमपि महाकाव्येऽस्मिन् अनुशीलयितुं शक्यते। जलं हि सर्वेभ्यो जीवेभ्यो प्राणदातृत्वात् पृथिव्यां नितरामधिकम्महत्त्वास्पदमिति स्वीक्रियते। निर्मलं पवित्रञ्च जलं सर्वमलापहारि विविधप्राणिवर्गस्य पिपासाशमनकारणं सन्ततं वहच्चेदञ्जीवानाम्प्रेरणाभूतमिति सर्वं पवित्रितम्पर्यावरणीयं तथ्यं स्वधियां संस्थाप्य महर्षिवाल्मीकिना जलतत्त्वस्यास्य नैकवारं यथाप्रसङ्गश्चेतनाप्राधान्यञ्चित्रं खचितम्। यथाऽयोध्यायां वहन्त्यास्तमसाया नद्या उल्लेखेन तस्यास्सौन्दर्यपावित्र्यादीनां वर्णनोपन्यासेन च वाल्मीकिना कथञ्चित् पर्यावरणीया जागृतिरेव सम्प्रसारिता। तथाह्येतद् वचनं वाल्मीकिमुखादेवन्निःसृतम्-

**अकर्दममिदन्तीर्थं भरद्वाज निशामय।**
**रमणीयं प्रसन्नाम्बु सन्मनुष्यमनो यथा।।**[xv]

अनयैव सरण्या विविधानां नदीनां सौन्दर्यवर्णनेन[xvi] महर्षिवाल्मीकिना जलतत्त्वम्प्रति स्वकीया परिनिष्ठा किं वा जागृतिस्सन्दर्शिताऽस्ति, विशिष्य गङ्गाया नद्याः संशान्तं वेगयुतं गम्भीरनिःस्वनञ्च जलप्रवाहस्वभवञ्चित्रयतो वाल्मीके: कविनैपुण्यं सहृदयान् आनन्दसागरेऽवगाहयति।

यथोक्तम्- क्वचित् स्तिमितगम्भीरां क्वचिद् वेगसमाकुलाम्। क्वचिद् गम्भीरनिर्घोषा क्वचिद् भैरवनिःसृताम्।[xvii] तत्रैव च विहितं प्रकृते: सुषमावर्णनं नद्या जलविषयकं समादरणीयत्ववचनोपस्थापनञ्च[xviii] महर्षेर्वाल्मीकेर्जलमहत्त्व-प्रख्यापनमतमपि च स्पष्टीकुरुतः। महाकाव्यकर्ता मुनिनाऽनेन नद्या गङ्गाया वर्णनप्रसङ्ग एव तस्य जलमाहात्म्यमीदृशं यत् षष्टिसहस्रसङ्ख्याकानां सगरपुत्राणामपि शापाद्विमोचनञ्जातमिति कथांऽशप्रदर्शनेन समुपबृंहितम्। तद्यथा -

**तत्रर्षिगणगन्धर्वा वसुधातलवासिनः।**

**भवाङ्गपतितन्तोयं पवित्रमिति संस्पृशुः।।**

**शापात् प्रपतिता ये च गगनाद् वसुधातलम्।**

**कृत्वा तत्राभिषेकन्ते बभूवुर्गतकल्मषाः।।**

**धूतपापा: पुनस्तेन तोयेनाथ शुभान्विताः।**

**पुनराकाशमाविश्य स्वांल्लोकान् प्रतिपेदिरे।**[xix]

नदीनां सन्निधिविशिष्टं हि तीर्थमिति पदम्, जगतोऽस्मात्त्रायते जगतस्त्राणस्थानमिति व्युत्पत्त्या संसारतरणस्थानमेव तीर्थत्वेन ज्ञायते। भारतीयायां संस्कृतौ हि तीर्थानाम्महत्वोल्लेख: कस्याश्चिदपि पवित्रसलिलयुताया नद्या वर्णनेन सहैव सम्प्राप्यते। अस्मिन् महाकाव्येऽपि तीर्थानां वर्णनप्रसङ्गे नद्यास्तज्जलराशेश्च माहात्म्यं समुपस्थापयताऽऽदिकविना वाल्मीकिना जलतत्त्वम्प्रति विशिष्टैव दृष्टिरुपस्थापिताऽस्ति। तथा ह्येकमुदाहरणमत्र निर्दिश्यते-

**अथासाद्य तु कालिन्दीम्प्रतिस्रोतः समागताम्।**

**तस्यास्तीर्थं प्रचरितम्प्रकामम्प्रेक्ष्य राघवः।।**[xx]

अनयैव दिशा नदीनान्दैवीमाहात्म्यमपीमामेव पर्यावरणीयाञ्चेतनां समुत्थापयति। अस्य दैवीमाहात्म्यस्य नैकत्र प्रसङ्गो विस्तीर्णस्तद्यथा सीतया विहिता गङ्गास्तुतेर्निदर्शनेयम् -

**मध्यन्तु सम्प्राप्य भागीरथ्यास्त्वनिन्दिता।**

**वैदेही प्राञ्जलिर्भूत्वा तां नदीमिदमब्रवीत्॥**

**पुत्रो दशरथस्यायम्महाराजस्य धीमतः।**

**निदेशम्पालयत्वेनं गङ्गे! त्वदभिरक्षितः।।**

**चतुर्दश हि वर्षाणि समग्राण्युष्य कानने।**

**भ्रात्रा सह मया चैव पुनः प्रत्यागमिष्यति।।**[xxi]

अपरञ्च भीतया सीतयैव गोदावर्या नद्याः प्रार्थितं वचनमिदं यदा हि सा रावणेन बलान्नीयमानाऽऽसीत् -

**हंससारसङ्घष्टां वन्दे गोदावरी नदीम्।**

**क्षिप्रं रामाय शंसध्वं सीतां हरति रावणः।।**[xxii]

एतदपि नद्यामवबोधितं विशिष्टं दैवीमाहात्म्यं यथाकथञ्चिज्जलगताम्पर्यावरणचेतनाम्प्रत्येव सङ्केतप्रयास इति पर्यावरणीयाञ्चेतनामात्मसात्कृत्यानुभवितुं शक्यते। यदा च स्वीयधनुषाऽन्वितः श्रीराम आसमन्तमेव समुद्रं शोषयितुंतत्समुद्रपुरस्सरमेव प्रतिज्ञावचो धृतवान्; तद्धि वचनं स्वविशालानां वानरर्क्षसाहाय्यानां स्वस्य च मध्ये

लङ्कागमनार्थम् आसमन्तं समुद्रम्बाधाम्मन्यमानेन रोषयुतेन राममुखेन वाल्मीकिर्नैव प्रस्तुतम्-

**अथोवाच रघुश्रेष्ठः सागरन्दारुणं वचः।**

**अद्य त्वां शोषयिष्यामि सपातालम्महार्णव॥**[xxiii]

इति, ततः पूर्वन्तस्य रोषन्दृष्ट्वा न केवलं सागरस्थानाञ्जीवानां[xxiv] सम्भ्रान्तिवर्णनमेवापितु तत्प्रतिज्ञावचनात् पश्चाच्च सम्पर्णायां सृष्टौ नैकसङ्कोभदृश्यानां वर्णनोपन्यासश्च,[xxv] विविधजीवनां वसतेर्निवासस्थानस्य वा विध्वंस ईदृशः पर्यावरणीयन्तन्त्रं विनङ्क्ष्यति, इति विचारपुरस्सरं कथासरण्यामस्यां सन्दर्भमिमाधृत्य सागरस्योपरि यथाऽऽवश्यकेन केवलेन मार्गनिर्माणेन किं वा स्वयं सागरोक्तेन नलसम्पादितेन च सेतुनिर्माणरूपेण व्यापारेण नितरामेवैतत्पर्यावरणसम्बद्धा विशिष्टा चेतना सङ्केतिता भवति।

**वाल्मीकिरामायणे वायुचेतनाविषय:-** इतोऽग्रे वायुतत्त्वमाधारीकृत्य वाल्मीकिरामायणीया पर्यावरणचेतनोपस्थाप्यते। सीताऽन्वेषाणादिविविधकथाप्रसङ्गैर्हनुमतो हि रामायणे विशिष्टं स्थानमिति सुस्पष्टीभवति। स च वायुपुत्रत्वेन विद्यतेऽत्र ख्यापित:[xxvi], किं वा वायुतत्त्वप्रतिनिधिभूतस्य हनुमतो रामायणीयायां हि कथायामुपस्थितित्वेन वायगत: पर्यावरणचेतनताविषय एव वारं वारन्ध्वन्यते। एतस्मिन् विषये राघवसम्मुखं स्वपरिचयप्रदानावसरे तस्य वचनमिदम्प्रमाणम्, तच्च-

**युवाभ्यां स हि धर्मात्मा सुग्रीवः सख्यमिच्छति।**

**तस्य मां सचिवं वित्तं वानरम्पवनात्मजम्॥**[xxvii]

इन्द्रवज्रप्रहारेणान्तरिक्षतो विनिपातितस्यास्य हनुमत एव प्रसङ्गं वर्णयता वाल्मीकिना वायोर्महत्त्वं किं वा प्राणिमात्रजीवनार्थन्तस्यानिवार्यत्वं समीचीनतया प्रतिपादितम्। यथोक्तन्तत्रोत्तरकाण्डे वायुना विनाऽवरुद्धायाः समस्तजीवनप्रक्रियाया विषये -

**वायुप्रकोपाद् भूतानि निरुच्छ्वासानि सर्वतः।**

**सन्धिभिर्भिद्यमानैश्च काष्ठभूतानि जज्ञिरे।।**

**नि:स्वाध्यायवषट्कारं निष्क्रियन्धर्मवर्जितम्।**

**वायुप्रकोपात्त्रैलोक्यं निरवस्थमिवाभवत्।।**[xxviii]

इतोऽग्रे प्रसङ्गेऽस्मिन्नैव वायोः कियद्भूतमनिवार्यत्वमित्यपि स्पष्टीकृतम्, तद्यथा-

**अशरीर: शरीरेषु वायुश्चरजि पालयन्।**

**शरीरं हि विना वायुं समतां याति दारुभिः॥**

**वायुः प्राणं सुखं वायुर्वायुः सर्वमिदञ्जगत्।**

**वायुना सम्परित्यक्तं न सुखं विन्दते जगत्।।**[xxix]

**वाल्मीकिरामायणे ध्वनिचेतनाविषय**:- इतः परम् अद्यतनन्ध्वनि-प्रदूषणविषयं हृदि संस्थाप्य शब्दगुणकम्पञ्चभूतेषु महत्त्वपूर्णमाकाशन्तत्सम्बद्धञ्च चेतनत्वम्, अर्थतत्तत्त्वचेतनप्रसारार्थमपि किञ्चित् प्रामाणिकन्तत्त्वं रामायणे भवति समुपलब्धम्। गीतिगतम्माधुर्यम्अथयुद्धक्षेत्रीयोगभीरोनादः, एतयोर्द्वयोदिग्दर्शनमात्रेणैव रामायणीयङ्गगन-विषयकम्पर्यावरणचेतनत्वंस्पष्टीभवितुमर्हति। तद्यथा क्रमश उदाहरणमेतयोः-

**अभिगीतमिदं गीतं सर्वगीतिषु कोविदौ॥**

**आयुष्यम्पुष्टिजननं सर्वश्रुतिमनोहरम्।** [xxx]

**ह्लादयत् सर्वगात्राणि मनांसि हृदयानि च।**

**श्रोता श्रयसुखं गेयन्तद्वभौ जनसंसदि।।**[xxxi]

**तस्या स्फोटितशब्देन महता चानुनादिना।**

**पेतुर्विहङ्गा गगनादुच्चैश्चेदमघोषयत्।।**[xxxii]

**वाल्मीकिरामायणे तेजश्चेतनाविषयः-** एवञ्च तेजोविषयिणी चेतनाऽप्यत्र समुल्लिखिता विद्यते। इदन्तेजः पञ्चमहाभूतेष्वन्यतमम् इति सर्वेषामनुभवविषय एव। यदा हि सूर्यरूपन्तेजो जगति नाभविष्यत्तर्हि जगति जीवनप्रक्रियाया ईदृशमपि रूपं नास्थास्यत्। सूर्यमयूखानामेवायम्प्रभावो यच्चराचरं समस्तजगत् जीवदत्र स्थितन्दश्यमानम्भवति। तेजस ईदृग्रूपस्य महत्त्वप्रतिपादकं रावणोपरि विजयलाभाभीप्सुना रामेण विहितं सुप्रथितमादित्यहृदयस्तोत्रं वर्तते, यस्य पाठानन्तरमेव विजयश्रिया स रामो युक्तो जातः। अस्यादित्यहृदयस्तोत्रान्तर्गतं वचनमिदमेतत्सम्बद्धां विशिष्टाञ्जागृतिं स्पष्टयति-

**नाशयत्येष वै भूतन्तमेव सृजति प्रभुः।**

**पायत्येष तपत्येष वर्षत्येष गभस्तिभिः॥**

**देवाश्च क्रतवश्चैव ऋतूनाम्फलमेव च।**

**यानि कृत्यानि लोकेषु सर्वेषु परमप्रभुः।।**[xxxiii]

एवम्पञ्चमहाभूतैर्विनिर्मितमिदं समस्तजगत्, तद्विषयकाणाञ्चेतनया संयुक्तानां विविधप्रसङ्गानां सम्प्राप्त्या च वाल्मीकिरामायणस्य पर्यावरणीया चेतनादृष्टिर्विकसिता भवति।

**वाल्मीकिरामायणे प्राणिवर्गचेतनाविषयः-** अनयैव सरण्या प्राणिजागतिकीचेतनासमुपन्यासेनापि वाल्मीकीयरामायणस्य पर्यावरणम्प्रति जाग्रतमवधानं स्पष्टायते। विभिन्नानाम्पशूनाम्पक्षिणाम् अत्र नैकप्रसङ्गानुसारं विहितं वर्णनमपि पर्यावरणम्प्रति चेतनायुतत्वं कथं सम्प्रदर्शयतीत्युल्लेखोऽत्र विधीयते।

रावणेन हृतायाः सीताया अन्वेषणसमये मृगैर्विहिताभिश्चेष्टावर्णनाभिः खलु प्रतीतिरियमुद्भवति यत्ते पशवोऽन्वेषकं रामम्प्रति सीताविषये सङ्केतयितुं प्रयासरतास्सन्तीति। तथाह्यस्य निदर्शनम्-

**क्व सीतेति निरीक्षन् वै वाष्पसंरुद्धया गिरा।**
**एवमुक्ता नरेन्द्रेण ते मृगाः सहसोत्थिताः।**
**दक्षिणाभिमुखाः सर्वे दर्शयन्तो नभस्थलम्।**
**मैथिली ह्रियमाणा सा दिशं यामभ्यपद्यत॥**
**तेन मार्गेण गच्छन्तो निरीक्षन्ते नराधिपम्।**
**येन मार्गश्च भूमिश्च निरीक्षन्ते स्म ते मृगाः।**
**पुनर्नदन्तो गच्छन्ति लक्ष्मणेनोपलक्षिताः।**
**तेषां वचनसर्वस्वं लक्षयामास चेङ्गितम्॥**[xxxiv]
**दर्शयन्ति क्षितिञ्चैव दक्षिणाञ्च दिशम्मृगाः।**
**साधु गच्छावहे देव! दिशमेताञ्च नैऋतीम्।।**[xxxv]

अत्रैव महाकाव्ये पक्षिणो जटायुनाम्नो गृध्रस्य रावणेन सह कृतं युद्धं केवलम् अबलायाः संरक्षणमुद्दिश्यासीद्[xxxvi] इत्यपि स्पष्टीभवति। सीताऽन्वेषणक्रमे हि रामस्तस्य जटायुनाम्नो गृध्रस्य दुरवस्थाकारणञ्चाज्ञातवान्, ततश्चानयैव दुरवस्थया तस्य गृध्रराजस्य मृत्योरनन्तरन्तस्यान्त्येष्टिसंस्कारञ्जलिप्रदानञ्चेत्युभाभ्यां कर्मभ्यां पक्षिणाम्प्रत्युदात्ताम्मान वीयाम्भावनाम्प्रदर्शितवन्तौ रामो लक्ष्मणश्च। तद् वचनं विषयसम्बद्धमिदम्-

**एवमुक्त्वा चितान्दीप्तामारोप्य पतगेश्वरम्।**
**ददाह रामो धर्मात्मा स्वबन्धुमिव दुःखितः।।**[xxxvii]
**ततो गोदावरीं गत्वा नदीं नरवरात्मजौ।**
**उदकञ्चक्रतुस्तस्मै गृध्रराजाय तावुभौ।।**[xxxviii]

यथा जटायुनाम्नः पक्षिण: सीतारूपाय मनुष्याय साहाय्यार्थं स्वजीवनसम्बद्धमोह विसर्जनरूपोदात्तभावम्प्रति कार्तश्यज्ञापनार्थमीदृगाचरणेन रामेण प्राणिवर्गीयाऽतुलनीयैव चेतना प्रदर्शिता। एवमेव पशुपक्षिणामपि मानवसंयुक्तञ्चैतन्यन्तस्य रामस्यैव वनगमनसमये कीदृशमिति वाल्मीकिना सम्यगुपन्यस्तम्। तद्धि -

**व्यसृजन् कवलान् नागा गावो वत्सान् न पाययन्।**
**पुत्रम्प्रथमजं लब्ध्वा जननी नाभ्यनन्दत।।**[xxxix]

इतोऽप्यधिकं सीताऽन्वेषणादौ रामलक्ष्मणयोस्साहाय्यानां वानराणाम् ऋक्षाणान्ताभ्यां सम्मानप्रदर्शनम्, रामलक्ष्मणाभ्याञ्च तान् प्रति कृतज्ञताभावान्वयेन च काचिदलौकिक्येव

प्रेमसमुद्भतिर्वाल्मीकीये रामायणे सम्प्राप्यते। अनयोर्द्वयोः प्राणिवर्गयोः परस्परं समम्भावम्प्रदर्शयितृ वालिनोऽन्त्येष्टिसंस्कारसम्पादनकालिकं किष्किन्धाकाण्डस्थं वचनमिदम् -

**ततस्ते सहितास्तत्र ह्यङ्गदं स्थाप्य चाग्रतः।**

**सुग्रीवतारासहिताः सिषिचुलिने जलम्।।**

**सुग्रीवेणैव दीनेन दीनो भूत्वा महाबलः।**

**समानशोकः काकुत्स्थः प्रेतकार्याण्यकारयत्।।**[xl]

विना कारणं केषाञ्चिदपि प्राणिनां हिंसा न विधातव्येति[xli] रामम्प्रति सीतोक्तेन वचनेनापि पर्यावरणीया चेतनैव लक्षिता भवति। तथा हि वचनन्तस्या यद्देशधर्मानुसारेणैव भवता दण्डकारण्येऽहिंसया सह युतेन भवितव्यमिति, तद्यथा- क्व च शास्त्रं क्व च वनं क्व च क्षात्रन्तपः क्व च।

**व्याविद्धमिदमस्माभिर्देशधर्मस्तु पूज्यताम्।।**[xlii]

**वाल्मीकिरामायणे प्रकृतिचेतनाविषयः-** इतः परम्पर्यावरणचेतना निहितमन्यद्वनस्पत्यौषधीनामन्यप्रकृतिसम्पूरितानां विषयाणामुपस्थापनं विधीयते। पर्यावरणशुद्धयर्थं तत्संरक्षणार्थञ्च येषां वृक्षाणामुपस्थितिरत्यावश्यकीति मन्यते या समेषां विविधानां वनस्पत्यौषधीनां वर्णनेन महाकाव्येऽस्मिन् रामायणे तन्निष्ठञ्चैतन्यमनुभवितुं शक्यते। केषाञ्चिद्विशिष्टवृक्षाणां वर्णनोपन्यासोऽरण्यकाण्डे यथा-

**जम्बूप्रियालपनसा न्यग्रोधप्लक्षतिन्दुकाः।**

**अश्वत्थाः कर्णिकाराश्च चूताश्चान्ये च पादपाः।।**

**धन्वना नागवृक्षाश्च तिलका नक्तमालकाः।**

**नीलाशोकाः कदम्बाश्च करवीराश्च पुष्पिताः।।**[xliii]

एवमेव भरद्वाजमुनेराश्रमदृश्ये[xliv] पञ्चवटीदृश्ये[xlv] च वृक्षपुष्पादिसम्बद्धं वर्णनचित्रणं लभ्यते। अतः परम् ईदृश्या एव वर्णनाऽऽवल्या नैकत्रसुगुम्फनं रामायणेऽस्मिन् प्राप्यते।[xlvi] अरण्यकाकाण्डस्थं किष्किन्धाकाण्डस्थञ्च वर्णनम् अरण्यानाम्महत्त्वञ्चित्ते सम्प्रधायैव महाकाव्येऽस्मिन् सुविस्तृतञ्जातम् इति निर्णेतुं शक्यते। सुन्दरकाण्डस्थेनाप्युद्यानपरक प्रकृतिसौन्दर्यचित्रणेन[xlvii] किं वा समग्ररामायणोपलब्धेन वनस्पतिवर्णनेन पर्यावरणीयाशुद्धता चिरम् अनाविद्धा सती सुस्थिरा स्यादिति पर्यावरणचेतनैव मूलं सन्तिष्ठत इति।

किमधिकम्, वनस्थं प्रतिवृक्षं वा विभिन्नन्देवम्प्रति बलादपहतायास्सीताया रामाय संसूचनादानार्थं विहिता प्रार्थनाऽरण्यादिविषयिणीञ्चेतनां समीचीनतया स्पष्टीकरोति। तच्च सीतया प्रार्थितं वचनम्-

**दैवतानि च यान्यस्मिन् वने विविधपादपे।**

**नमस्करोम्यहन्तेभ्यो भर्तुः शंसत मां हृताम्।।**[xlviii]

विविधनां सुदुः प्राप्यानामौषधीनाम्प्रसङ्गं वर्णयंस्तथाऽऽह महाकवि-र्वाल्मीकिः -

**विशल्यकरणी नाम्ना सावर्ण्यकरणीन्तथा।**

**सञ्जीवकरणीं वीरसन्धानीञ्च महौषधीम्।।**[xlix]

एतदौषधीनां वर्णनामात्रमेव न तन्निहितां चेतनां विज्ञापयत्यपितु वर्णनमिदं रामायणस्थम् औषधविषयकं विशिष्टामेव जागृतिम्प्रति साक्षादेव सङ्केतयति, तद्यथा-

**महौषध्यस्ततः सर्वास्तस्मिन् पर्वतसत्तमे।**

**विज्ञायार्थिनमायान्तन्ततो जग्मुरदर्शनम्।।**[l]

इतोऽपि रामायणनिहितम्पर्यावरणचैतन्यं प्रकृतिघटकानामन्यपदार्थानां विकीर्णतया वर्णनमाध्यममात्रेण समुपलभ्यते। सूर्यो जगत्यस्मिन् जीवनधार एव कल्पते, जीवनशक्तेरेवापरन्नामेदम्। एतत्सर्यसम्बद्धाया जागतिक्याः प्रक्रियायास्सष्ठु निदर्शनमरण्यकाण्डे वाल्मीकिनाऽनया दिशा विहितम्, तद्यथा-

**विलीयमानविहगैनिमीलद्भिश्च पङ्कजैः।**

**विकसन्त्या च मालत्या गतोऽस्तज्ञायते रविः।**[li]

ऋतूनां सौन्दर्यचित्रणेन माहात्म्यपूर्णेन वर्णनेनापि पर्यावरणीयन्ध्येयमेव स्पष्टीभवत्यादिकवेः। तद्यथा वर्षौवर्णनमाध्यमेनर्तृनाङ्कमनिरूपकं वचनमिदम्-

**अयं स कालः सम्प्राप्तः समयोऽद्य जलागमः।**

**सम्पश्य त्वं नभो मेघैस्संवृत्तं गिरिसन्निभैः।।**[lii]

इतः परमेव शरदर्तुवर्णनं विदधतो रामस्य लक्ष्मणम्प्रति सम्बोधितेन वचनमाध्यमेनारोपितप्रकृतिदृश्यावलिं[liii] समुपस्थाप्य किञ्चिदसामान्यमेव चेतनातत्त्वं विकीर्णम्।

**वाल्मीकिरामायणे सम्प्राप्ता अन्यान्यपर्यावरणचेतनाविषया:-** एवमेव दशरथमृत्योरनन्तरं तस्य पार्थिवशरीरस्य तैलद्रोण्यां संस्थापनं[liv] तात्कालिकमद्वितीयमेव पर्यावरणपरञ्चैतन्यं स्पष्टीकरोति।

अपरञ्च पर्यावरणीयञ्चैतन्यसन्दर्शनं रामरावणयोः परस्परमस्त्रप्रहारकौशलमभिलक्ष्योपस्थापयितुं शक्यते। तथा च श्लोकद्वयम्-

**स गान्धर्वेण गान्धर्वं दैवन्दैवेन राघवः।**

**अस्त्रं राक्षसराजस्य जघान परमस्त्रवित्॥**

**अस्त्रन्तु परमं घोरं राक्षसं राक्षसाधिपः।**

**ससर्ज परमक्रुद्धः पुनरेव निशाचरः।।**[iv]

**निष्कर्षः-** वस्तुतो रामायणं नाम महाकाव्यं न काव्यतत्त्वैरपितु तदीयशास्त्रतथ्यैरपि सम्पन्नम्। सामाजिक-सांस्कृतिकादिनां नैकतथ्यानामपि यथा सङ्ग्राहकमिदं तथैव पर्यावरणगतानां विविधतथ्यानामपि। नात्र केवलम्प्रत्यक्षतयैव तथ्यानीमानि श्लिष्टान्यपितु परोक्षतया तद्गतचैतन्यस्यस्योप-लब्धिरपि भृशञ्जायते। तद्यथा सर्पास्त्रादीनां गारुडास्त्रादिभिर्विनाशसन्दर्शनसन्दर्भोऽत्र सन्निविष्टोऽस्त्यादिकविना, वस्तुतोऽनयैव रीत्याऽऽधुनिकैश्चिकित्सकैर्वैज्ञानिकैश्च विषस्य शमनं प्रकृष्टेन विषेण किं वा विनाशकस्य निराकरणम्प्रबलेन विनाशकेन भाव्यमिति चैतन्यप्रदर्शनं पर्यावरणीयंनूनमेव नितरां प्रासङ्गिकमितितथ्योद्घाटनाधाररूपेण शक्यते परिगणयितुम्। किमधिकम्, एवमेवात्र वर्तते, बहु पर्यावरणीयन्तथ्यं तत्त्वं वायस्यसाक्षात् सन्निवेशनेन सङ्केतसाहाय्येन वा समग्रतयाऽनुशीलनं कर्तुशक्यते। एवं वाल्मीकियरामायणे नैकत्र सम्प्रसृतस्तानाहतो वा पर्यावरणचेतनाविषय इहानुशीलितः।

**सन्दर्भग्रन्थसूची**


1. वाल्मीकिः, रामायणम् (प्रथमखण्ड:) हिन्धनुवादसहितः, गोरक्षपुरम् गीताप्रेस गोरखपुर, 2001
2. वाल्मीकिः, रामायणम् (द्वितीयखण्ड:) हिन्द्यनुवादसहितः, गोरक्षपुरम् गीताप्रेसगोरखपुरः,2001
3. मम्मटः, काव्यप्रकाशः, सम्पादक:- निवासशास्त्री, मेरठः साहित्यभण्डारः,1960
4. पाणिनिः अष्टाध्यायी, सम्पादक:- गोपालदत्तपाण्डेयः, वाराणसी चौखम्भा सुरभारती प्रकाशन, 2004
5. भट्टोजिदीक्षितः, सिद्धान्तकौमुदी, सम्पादक:- भार्गवशास्त्री, मुम्बईः निर्णयसागर प्रेस, 1942
6. गौतम न्यायदर्शनम्, सम्पादक:- रघुनाथघोषः, नई दिल्ली: न्यू भारतीय बुक कॉरपोरेशन,2003
7. गणेशदत्तशर्मा, पर्यावरण प्रदूषण का वैदिक समाधान, संस्कृतविमर्शः, सम्पादक:- कमलाकान्तमिश्रः,
8. नवदेहली: राष्ट्रियसंस्कृतसंस्थानम्, १९९६ ईशादि नौ उपनिषद् (शाङ्कभाष्यार्थ), गोरखपुर: गीताप्रेस गोरखपुर, 1999
9. http://encyclopedia2.thefreedictionary.com/environment

[i] प्रथमनिखिलसंस्कृतच्छात्रसम्मेलनम्, २०१२" शोधसारः

[ii] भ्वादिगणस्थः, धातुसङ्ख्या - ४०५

[iii] अष्टाध्यायीसूत्रसङ्खया- ३/१/१२४

[iv] ईशावास्योपनिषदोऽष्टमश्श्लोकः- स पर्यगाच्छुक्रमकायम्....... कविर्मनीषी परिभूःस्वयम्भू.....इति

[v] काव्यप्रकाशस्य प्रथमोल्लासः, पृष्ठम् - ६

[vi] आञ्जनगन्धिं सुरभिं वहन्नामकृषीवलाम्। प्राहं मृगाणां मातरमरण्यानिताशंसिनीम्।। (ऋग्वेदः १०/१४६/६), संस्कृतविमर्शः, पृष्ठम् - १०३

[vii] स्वादिगणस्थः, धातुसङ्ख्या - १३३४

[viii] अष्टाध्यायीसूत्रसङ्ख्या- ३/३/११७

[ix] The sum of all external factors, both biotic (living) abiotic (non-living), to which an organism is exposed. Biotic factors include influences by members of the same and other species on the development and sur vival of the individual. Primary abiotic factors are light, temperature, water, atmospheric gases, and ionizing radiation, influencing the form and function of the individual. . . (http://encyclopedia2.thefreedictionary.com/environment) on 5th April 2012

[x] वाल्मीकिरामायणम्, बालकाण्डे - २/१५, पृष्ठम् - ६०

[xi] न्यायसूत्रम् - १/१/१३, पृष्ठम् - २१

[xii] वाल्मीकिरामायणम्, उत्तरकाण्डे-१८/४४, द्वितीयखण्डे पृष्ठम् - ७१५

[xiii] अथ मे कृषतः क्षेत्रं लाङ्गलादुत्थिता ततः।
क्षेत्रं शोधयता लब्धा नाम्ना सीतेति विश्रुता। भूतलादुत्थिता सा तु व्यवर्धत ममात्मजा। (अत्रैव, बालकाण्डे - ६६/१३-१४. प्रथमखण्डे पृष्ठम् - १९६)

[xiv] अत्रैव, उत्तरकाण्डे- ९८/७, द्वितीयखण्डे पृष्ठम् - ९००

[xv] वाल्मीकीयं रामायणम्, बालकाण्डे - २/५, प्रथमखण्डे पृष्ठम्-५९

[xvi] अत्रैव, सरयूनद्यास्तादृशं वर्णनम् - ६/१२३/५४ (द्वितीयखण्डे पृष्ठम् - ६४०);
नर्मदानद्यास्तादृशं वर्णनम् - ७/३२/२२-२६, (द्वितीयखण्डे पृष्ठम्); शोणभद्रनद्यास्तादर्श वर्णनम् - १/३२/१० (प्रथमखण्डे पृष्ठम् -१२९); मन्दाकिनी नाम नद्यास्तादृशं वर्णनम् - २/९५/१-५ (प्रथमखण्डे पृष्ठम् - ४९१)

[xvii] अत्रैव, अयोध्याकाण्डे - ५०/१७, प्रथमखण्डे पृष्ठम् - ३७२

[xviii] अत्रैव, अयोध्याकाण्डे - ५०/२२-२४, प्रथमखण्डे पृष्ठम्, ३७२

[xix] अत्रैव, बालकाण्डे - ४३/२६-२९, प्रथमखण्डे पृष्ठम्, १५२

[xx] वाल्मीकियं रामायणम्, अयोध्याकाण्डे - ५५/५, प्रथमखण्डे पृष्ठम्, ३९१

[xxi] अत्रैव, अयोध्याकाण्डे - ५२।८३-८४, प्रथमखण्डे पृष्ठम् - ३८३

[xxii] अत्रैव, किष्किन्धाकाण्डे - ४९/३१, प्रथमखण्डे पृष्ठम् - ६७२

[xxiii] अत्रैव, युद्धकाण्डे - २२/१, द्वितीयखण्डे पृष्ठम् - २९३

[xxiv] आघूर्णिततरङ्गौघः सम्भ्रान्तोरगराक्षसः।
उद्वर्तितमहाग्राहः सघोषो वरुणालयः।। (अत्रैव, युद्धकाण्डे-२१/३२), द्वितीयखण्डे पृष्ठम् २९२

[xxv] तस्मिन् विप्रकृष्टे सहसा राघवेण शरासने। रोदसी सम्पफालेव पर्वताश्च चकम्पिरे॥ तमश्च लोकमावतें दिशश्च न चकाशिरे। प्रतिचुक्षुभिरे चाशु सरांसि सरितस्तथा।। - तिर्यक् च सह नक्षत्रैः सङ्गतौ चन्द्रभास्करौ।। भास्करांशुभिरादीप्तन्तमसा च समावृताम्।। (अत्रैव, युद्धकाण्डे - २२/६-८) द्वितीयखण्डे पृष्ठम्-२९३

[xxvi] ताः सर्वा हनुमन् गृह्य क्षिप्रमागन्तुमर्हसि।
आश्वासय हरीन् प्राणैर्योज्य गन्धवहात्मज!॥ श्रुत्वा जाम्बवतो वाक्यं हनूमान् मारुतात्मजः।
आपूर्यत बलोद्धर्वायुवेगैरिवार्णवः।। (वाल्मीकियं रामायणम्, युद्धकाण्डे - ७४/३४-३५), द्वितीयखण्डे पृष्ठम्, ४८५

[xxvii] अत्रैव, किष्किन्धाकाण्डे - ३/२२, प्रथमखण्डे पृष्ठम् - ७५४

[xxviii] अत्रैव, उत्तरकाण्डे - ३५/५१-५२, द्वितीयखण्डे पृष्ठम् - ७७५

[xxix] अत्रैव, उत्तरकाण्डे - ३५/६०-६१, द्वितीयखण्डे पृष्ठम् - ७७५
[xxx] वाल्मीकिरामायणम्, बालकाण्डे - ४/२७ (श्लोकस्योत्तरार्धः) २८ (श्लोकस्यपूर्वार्धः),
प्रथमखण्डे पृष्ठम् - ६७
[xxxi] अत्रैव, बालकाण्डे - ४/३४; प्रथमखण्डे पृष्ठम् -६७
[xxxii] अत्रैव, सुन्दरकाण्डे - ४२/३२, द्वितीयखण्डे पृष्ठम् - १५७
[xxxiii] इहैव, युद्धकाण्डे - १०५/२२-२३, द्वितीयखण्डे पृष्ठम् - ५८८
[xxxiv] इहैव, अरण्यकाण्डे - ६४/१७-२०, प्रथमखण्डे पृष्ठम् - ७०८-७०९
[xxxv] अत्रैव, अरण्यकाण्डे - ६४/२२, प्रथमखण्डे पृष्ठम् - ७०९
[xxxvi] बाल्मीकिरामायणम्, अरण्यकाण्डे - ६७-१६-१९, प्रथमखण्डे पृष्ठम्, ७१७
[xxxvii] अत्रैव, अरण्यकाण्डे - ६८/६८/३१, प्रथमखण्डे पृष्ठम् - ७२०
[xxxviii] अत्रैव, अरण्यकाण्डे - ६८/३५, प्रथमखण्डे पृष्ठम् - ७२०
[xxxix] अत्रैव. अयोध्याकाण्डे - ४१/१०, प्रथमखण्डे पृष्ठम् - ३५२
[xl] अत्रैव. किष्किन्धाकाण्डे - २५/५२-५३, प्रथमखण्डे पृष्ठम् - ८१८
[xli] अत्रैव, अरण्यकाण्डे - ९/२६, प्रथमखण्डे पृष्ठम् - ५७२
[xlii] अत्रैव, अरण्यकाण्डे - ९/२७, प्रथमखण्डे पृष्ठम् - ५७२
[xliii] वाल्मीकिरामायणम्, अरण्यकाण्डे - ७३/३,४ प्रथमखण्डे पृष्ठम् - ७३१
[xliv] अत्रैव, अयोध्याकाण्डे - ९१/४९-५१, प्रथमखण्डे पृष्ठम् - ४८१
[xlv] . अत्रैव, अरण्यकाण्डे - १५/१६-१८, प्रथमखण्डे पृष्ठम् - ५८९
[xlvi] अत्रैव, अरण्यकाण्डे - त्रिसप्ततितमस्सर्गः, किष्किन्धाकाण्डे प्रथमस्सर्गः, युद्धकाण्डे-चतुर्थस्सर्ग इत्यादि।
[xlvii] अत्रैव, सुन्दरकाण्डे - १५/१-१७, द्वितीयखण्डे पृष्ठम् - ७७-७८
[xlviii] अत्रैव, अरण्यकाण्डे - ४९/३२, प्रथमकाण्डे पृष्ठम् - ६७२
[xlix] अत्रैव, युद्धकाण्डे - १०१/३२, द्वितीयखण्डे पृष्ठम् - ५७५
[l] अत्रैव, युद्धकाण्डे - ७४/६४, द्वितीयखण्डे पृष्ठम् - ४८७
[li] . वाल्मीकीयं रामायणम्, किष्किन्धाकाण्डे - २८/२, प्रथमखण्डे पृष्ठम् - ८२४
[lii] अत्रैव, किष्किन्धाकाण्डे - २८/२, प्रथमखण्डे पृष्ठम् - ८२४
[liii] रात्रिः शशाङ्कोदितसौम्यवक्त्रा, तारागोन्मीलितचारुनेत्रा।
ज्योत्स्नांशुकप्रावरणा विभाति, नारीव शुक्लांशुकसंवृताङ्गी॥ (अत्रैव, किष्किन्धाकाण्डे - ३०/४६), प्रथमखण्डे पृष्ठम् - ८३८
[liv] . तैलद्रोण्यान्तदामात्याः संवेश्य जगतीपतिम्।
राज्ञः सर्वाण्यथादिष्टाश्चक्रुः कर्माण्यनन्तरम्॥ (अत्रैव, अयोध्याकाण्डे - ६६/१४), प्रथमखण्डे पृष्ठम् - ४२२
[lv] अत्रैव, युद्धकाण्डे - १०२/१९, २०, द्वितीयखण्डे पृष्ठम् - ५७८